## त्यागरागहासकुहश्वठक्रथानाम् । (२१६/३७०४)

त्याग राग हास कुह श्वठ क्रथ [1]इत्येतेषां विभाषा आदिरुदात्तो भवति । त्यागः, त्यागः । रागः, रागः । हासः, हासः । एते घञन्ताः, तेषां पक्षे 'कर्षात्वतो घञोऽन्त उदात्तः' (६. १. १५९/३६८०) इत्युदात्तत्वमेव भवति । कुहः, कुहः । श्वठः, श्वठः । क्रथः, क्रथः । एते पचाद्यजन्ताः ॥

## उपोत्तमं रिति । (२१७/३७३३)

रिदन्तस्य उपोत्तममुदात्तं भवति । त्रिप्रभृतीनामन्त्य[2]मुत्तमम् तस्य समीपे यत् तद् उपोत्तमम् । करणीयम् । हरणीयम् । पटुजातीयः । मृदुजातीयः । प्रत्ययस्वरापवादो[3]ऽयम् ॥

## चङ्यन्यतरस्याम् । (२१८/३६७९)

चङन्तेऽन्यतरस्याम् उपोत्तममुदात्तं भवति । मा हि चीकरताम्, मा हि चीकरताम् । 'न माङ्योगे' (६. ४. ७४/२२२८) इत्यटि प्रतिषिद्धे 'हि च' (८. १. ३४/३९४१) इति निघातेऽडुपदेशात् इति लसार्वधातु-कानुदात्तत्वे (६. १. १८६/३७३०) कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तो भवति । उपोत्तमग्रहणाद् द्व्यचो न भवति, मा हि दधत् ॥

## मतोः पूर्वमात् सञ्ज्ञायां स्त्रियाम् । (२१९/३७०५)

मतोः पूर्वः आकार उदात्तो भवति तच्चेन्मत्वन्तं स्त्रीलिङ्गे सञ्ज्ञा भवति । उदुम्बरावती । पुष्करावती । बीरणावती । शरावती । 'शरादीनां च' (६. ३. १२०/१०४२) इति दीर्घः । आत् इति किम् ? इक्षुमती । द्रुमवती । सञ्ज्ञायाम् इति किम् ? खट्वावती । स्त्रियाम् इति किम् ? शरावान् । [4]मतोः इति किम् ? गवादिनी ॥

## अन्तोऽवत्याः । (२२०/३७०६)

[5]सञ्ज्ञायाम् इत्येव । अवतीशब्दान्तस्य सञ्ज्ञायामन्त उदात्तो भवति । अजिरवती । खदिरवती । हंसवती । कारण्डवती । ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् । अवत्याः इति[6] [7]किमुच्यते, न वत्या इत्येवमुच्येत ? नैवं शक्यम्. इहापि स्यात्, राजवती । स्वरविधौ नलोपस्यासिद्धत्वान्नायमवतीशब्दः । वत्वं पुनराश्रयात् सिद्धम् ॥

## ईवत्याः । (२२१/३७०७)

ईवतीशब्दान्तस्यान्त उदात्तो भवति स्त्रियां सञ्ज्ञायां [8]विषये । अहीवती । कृषीवती । मुनीवती ॥

---

1. एतेषां नास्ति ब. 2. अक्षरं इत्यधिकम् ह. 3. अयं नास्ति फ. 4. मतोः नास्ति फ. 5. स्त्रियाम् इत्यधिकम् ड. फ. 6. निर्देशादिह न भवति इत्यधिकम् फ. 7. किमर्थम् फ. ह. 8. विषये नास्ति फ.